# शिवस्तुति

**Compiled by: Raman Kizhakkedath** ©

February 4, 2010

# ഉള്ളടക്കം


**Contents** **i**

**Preface** **1**

**1 śivabhujaṅgaprayātam** **3**

**2 śivapañcacāmaram** **11**

**3 liṅgāṣṭakam** **15**

**Bibliography** **17**

**Index** **18**

# ചിത്രങ്ങൾ

# ടേബിളുകൾ

# Preface

This is a reproduction of the शिवस्तुति (*śivastuti*) made with the intention of archiving. Therefore the text has been scrutinized carefully and also got checked by learned persons.

I have started this work on 22.01.2010 only to chant भुजङ्गप्रयातम् हृ पङ्चामरम् . I got the blessings of महादेव to compleat this book.

**शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम्**
**शिवमार्गप्रणेतारं प्रणतोस्मि सदाशिवम्**

# അദ്ധ്യായം 1

## śivabhujaṅgaprayātam

ॐ गंगणपतये नमः

ॐ नमःशिवायः

गलद्दानगण्डं मिलद्भृङ्गषण्डम्
चलच्चारुशुण्डं जगत्त्राणशौण्डम्
कनद्दन्तकाण्डं विपद्भङ्गचण्डम्
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ०१

अनाद्यन्तमाद्यं परं तत्त्वमर्थम्
चिदाकारमेकं तुरीयं त्वमेयम्
हरिब्रह्ममृग्यं परब्रह्मरूपम्
मनोवागतीतं महःशैवमीडे ०२

स्वशक्त्यादिशक्त्यन्तसिंहासनस्थं
मनोहारिसर्वाङ्गरत्नोरुभूषम्
जटाहीन्दुगङ्गास्थिशम्याकमौलिं
पराशक्तिमित्रं नुमः पञ्चवक्त्रम् ०३

शिवेशानतत्पूरुषाघोरवामा-
दिभिः पञ्चभिर्हृन्मुखैः षड्भिरङ्गैः

अनौपम्य षट्त्रिंशतं तत्त्वविद्या-
मतीतं परं त्वां कथं वेत्ति को वा ०४

प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहःश्याममर्धम्
गुणस्यूतमेतद्वपुः शैवमन्तः
स्मरामि स्मरापत्तिसम्पत्तिहेतोः ०५

स्वसेवासमायातदेवासुरेन्द्रा-
नमन्मौलिमन्दारमालाभिषिक्तम्
नमस्यामि शंभो पदाम्भोरुहं ते
भवाम्भोधिपोतं भवानीविभाव्यम् ०६

जगन्नाथ मन्नाथ गौरीसनाथ
प्रपन्नानुकम्पिन्विपन्नार्तिहारिन्
महःस्तोममूर्ते समस्तैकबन्धो
नमस्ते नमस्ते पुनस्ते नमोऽस्तु ०७

विरूपाक्ष विश्वेश विश्वादिदेव
त्रयीमूल शंभो शिव त्र्यम्बक त्वम्
प्रसीद स्मर त्राहि पश्यावमुक्त्यै
क्षमां प्राप्नुहि त्र्यक्ष मां रक्ष मोदात् ०८

महादेव देवेश देवादिदेव
स्मरारे पुरारे यमारे हरेति
ब्रुवाणः स्मरिष्यामि भक्त्या भवन्तम्
ततो मे दयाशील देव प्रसीद ०९

त्वदन्यः शरण्यः प्रपन्नस्य नेति
प्रसीद स्मरन्नेव हन्यास्तु दैन्यम्
न चेत्ते भवेद्भक्तवात्सल्यहानि-
स्ततो मे दयालो सदा संनिधेहि १०

अयं दानकालस्त्वहं दानपात्रं
भवानेव दाता त्वदन्यं न याचे
भवद्भक्तिमेव स्थिरां देहि मह्यम्
कृपाशील शंभो कृतार्थोऽस्मि तस्मात् ११

पशुं वेत्सि चेन्मां तमेवाधिरूढः
कलङ्कीति वा मूर्ध्नि धत्से तमेव
द्विजिह्वः पुनः सोऽपि ते कण्ठभूषा
त्वदङ्गीकृताः शर्व सर्वेऽपि धन्याः १२

न शक्नोमि कर्तुं परद्रोहलेशं
कथं प्रीयसे त्वं न जाने गिरीश
तथाहि प्रसन्नोऽसि कस्यापि कान्ता-
सुतद्रोहिणो वा पितृद्रोहिणो वा १३

स्तुतिं ध्यानमर्चां यथावद्विधातुं
भजन्नप्यजानन्महेशावलम्बे
त्रसन्तं सुतं त्रातुमग्रे मृकण्डो-
र्यमप्राणनिर्वापणं त्वत्पदाब्जम् १४

शिरोदृष्टिहृद्रोगशूलप्रमेह-
ज्वरार्शोजरायक्ष्महिक्काविषार्तान्
त्वमाद्यो भिषग्भेषजं भस्म शंभो

त्वमुल्लाघयास्मान्वपुर्लाघवाय १५

दरिद्रोऽस्म्यभद्रोऽस्मि भग्नोऽस्मि दूये
विषण्णोऽस्मि सन्नोऽस्मि खिन्नोऽस्मि चाहम्
भवान्प्राणिनामन्तरात्मासि शंभो
ममाधिं न वेत्सि प्रभो रक्ष मां त्वम् १६

त्वदक्ष्णोः कटाक्षः पतेत्यक्ष यत्र
क्षणं क्ष्मा च लक्ष्मीः स्वयं तं वृणाते
किरीटस्फुरच्चामरच्छत्रमाला-
कलाचीगजक्षौमभूषाविशेषैः १७

भवान्यै भवायापि मात्रे च पित्रे
मृडान्यै मृडायाप्यघघ्न्यै मखघ्ने
शिवाङ्ग्यै शिवाङ्गाय कुर्मः शिवायै
शिवायाम्बिकायै नमस्त्र्यम्बकाय १८

भवद्गौरवं मल्लघुत्वं विदित्वा
प्रभो रक्ष कारुण्यदृष्ट्यानुगं माम्
शिवात्मानुभावस्तुतावक्षमोऽहं
स्वशक्त्या कृतं मेऽपराधं क्षमस्व १९

यदा कर्णरन्ध्रं व्रजेत्कालवाह-
द्विषत्कण्ठघण्टाघणात्कारनादः
वृषाधीशमारुह्य देवौपवाह्यं
तदा वत्स मा भीरिति प्रीणय त्वम् २०

यदा दारुणाभाषणा भीषणा मे

भविष्यन्त्युपान्ते कृतान्तस्य दूताः
तदा मन्मनस्त्वत्पदाम्बोरुहस्थं
कथं निश्चलं स्यान्नमस्तेऽस्तु शंभो २१

यदा दुर्निवारव्यथोऽहं शयानो
लिठन्निःश्वसन्निःसृताव्यक्तवाणिः
तदा जह्नुकन्याजलालङ्कृतं ते
जटामण्डलं मन्मनोमन्दिरं स्यात् २२

यदा पुत्रमित्रादयो मत्सकाशे
रुदन्त्यस्य हा कीदृशीयं दशेति
तदा देवदेवेश गौरीश शंभो
नमस्ते शिवायेत्यजस्रं ब्रवाणि २३

यदा पश्यतां मामसौ वेत्ति नास्मा-
नयं श्वास एवेति वाचो भवेयुः
तदा भूतिभूषं भुजङ्गावनद्धं
पुरारे भवन्तं स्फुटं भावयेयम् २४

यदा यातनादेहसंदेहवाही
भवेदात्मदेहे न मोहो महान्मे
तदा काशशीतांशुसङ्काशमीश
स्मरारे वपुस्ते नमस्ते स्मराणि २५

यदापारमच्छायमस्थानमद्भि-
र्जनैर्वा विहीनं गमिष्यामि मार्गम्
तदा तं निरुन्धन्कृतान्तस्य मार्गं
महादेव मह्यं मनोज्ञं प्रयच्छ २६

यदा रौरवादि स्मरन्नेव भीत्या
व्रजाम्यत्र मोहं महादेव घोरम्
तदा मामहो नाथ कस्तारयिष्य-
त्यनाथं पराधीनमर्धेन्दुमौले २७

यदा श्वेतपत्रायतालङ्घ्यशक्तेः
कृतान्ताद्भयं भक्तवात्सल्यभावात्
तदा पाहि मां पार्वतीवल्लभान्यं
न पश्यामि पातारमेतादृशं मे २८

इदानीमिदानीं मृतिर्मे भवित्री-
त्यहो संततं चिन्तया पीडितोऽस्मि
कथं नाम मा भून्मृतौ भीतिरेषा
नमस्ते गतीनां गते नीलकण्ठ २९

अमर्यादमेवाहमाबालवृद्धं
हरन्तं कृतान्तं समीक्ष्यास्मि भीतः
मृतौ तावकाङ्घ्र्यब्जदिव्यप्रसादा-
द्भवानीपते निर्भयोऽहं भवानि ३०

जराजन्मगर्भाधिवासादिदुःखा-
न्यसह्यानि जह्यां जगन्नाथ देव
भवन्तं विना मे गतिर्नैव शंभो
दयालो न जागर्ति किं वा दया ते ३१

शिवायेति शब्दो नमः पूर्व एष
स्मरन्मुक्तिकृन्मृत्युहा तत्त्ववाची

महेशान मा गान्मनस्तो वचस्तः
सदा मह्यमेतत्प्रदानं प्रयच्छ ३२

त्वमप्यम्ब मां पश्य शीतांशुमौलि-
प्रिये भेषजं त्वं भवव्याधिशान्तौ
बहुक्लेशभाजं पदांभोजपोते
भवाब्धौ निमग्नं नयस्वाद्य पारम् ३३

अनुद्यल्ललाटाक्षिवह्निप्ररोहै-
रवामस्फुरच्चारुवामोरुशोभैः
अनङ्गभ्रमद्भोगिभूषाविशेषै-
रचन्द्रार्धचूडैरलं दैवतैर्नः ३४

अकण्ठेकलङ्कादनङ्गेभुजङ्गा-
दपाणौकपालादफालेनलाक्षात्
अमौलौशशाङ्कादवामेकलत्रा-
दहं देवमन्यं न मन्ये न मन्ये ३५

महादेव शंभो गिरीश त्रिशूलिं-
स्त्वदीयं समस्तं विभातीति यस्मात्
शिवादन्यथा दैवतं नाभिजाने
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ३६

यतोऽजायतेदं प्रपञ्चं विचित्रं
स्थितिं याति यस्मिन्यदेकान्तमन्ते
स कर्मादिहीनः स्वयंज्योतिरात्मा
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ३७

किरीटे निशेशो ललाटे हुताशो
भुजे भोगिराजो गले कालिमा च
तनौ कामिनी यस्य तत्तुल्यदेवं
न जाने न जाने न जाने न जाने ३८

अनेन स्तवेनादरादम्बिकेशं
परां भक्तिमासाद्य यं ये नमन्ति
मृतौ निर्भयास्ते जनास्तं भजन्ते
हृदम्बोजमध्ये सदासीनमीशम् ३९

भुजङ्गप्रियाकल्प शंभो मयैवं
भुजङ्गप्रयातेन वृत्तेन कॢप्तं
नरः स्तोत्रमेतत्पठित्वोरुभक्त्या
सुपुत्रायुरारोग्यमैश्वर्यमेति ४०

इति श्रीमत्परमहंसपरिव्रजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवत्पाद कृतौ शिवभुजङ्गं सम्पूर्णम्

# അദ്ധ്യായം 2

## śivapañcacāmaram

ॐ गंगणपतये नमः

ॐ नमःशिवायः

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम्
डमड्डमड्डमड्डमन्निनादवड्डमर्वयम्
चकार चण्डताण्डवं तनोतु नः शिवश्शिवम् ०१

जटाकटाहसम्भ्रमभ्रमन्निलिम्बनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि
धगद्धगद्धगज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रदक्षिणं मम ०२

धराधरेन्द्रनन्दिनीविलास बन्धुबन्धुर-
स्फुरद्दृगन्तसन्ततिप्रमोदमानमानसे
कृपाकटाक्षधोरणीनिरुद्धदुर्द्धरादपि
क्वचिद्दिगम्बरे मनोविनोदमेतु वस्तुनी ०३

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे

मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनोविनोदमत्भुतं बिभर्तुभूतभर्तरि ०४

सहस्रलोचनप्रभृत्यशेषलेखशेखर
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः
भुजङ्गराजमालया निबद्धजाटजूटक-
श्रियै चिराय जायतां चकोरबन्धुशेखरः ०५

ललाटचत्वरज्ज्वलद्धनञ्जयस्फुलिंगभा
निपीतपञ्चसायकं नमन्निलिम्पनायकम्
सुधामयूखलेखया विराजमानशेखरम्
महाकपालिसम्पदे शिरोजटालमस्तु नः ०६

करालफालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनञ्जयाधरीकृत प्रचण्डपञ्चसायके
धराधरेन्द्रनन्दिनीकुचाग्रपत्रचित्रक
प्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ०७

नवीनमेघमण्डलीनिरुद्धदुर्द्धरस्फुरत्
कुहूनिशीधिनीतमःप्रबन्धबन्धकन्धरः
निलिम्बनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिदानबन्धुरः श्रियं जगद्धुरन्धर ०८

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमच्छटा
विडम्बिकण्ठकस्थरारुचिप्रबन्धकन्धरम्
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदम्
गजच्छिदान्धकच्छिदं तमन्तकान्तकं भजे ०९

अगर्वसर्वमंगलाकलाकदम्बमञ्जरी
रसप्रवाहमाधुरीविजृम्भणामधुव्रतम्
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे १०

जयत्वतभ्रविभ्रमभ्रमत्भुजंगमस्फुर-
द्धगद्धगद्विनिर्गमत्करालफालहव्यवाट्
धिमिद्धिमिद्धिध्वनन्मृदंगमंगलध्वनी
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवशिवः ११

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
गरिष्ठरत्नलोष्ठयोसहृद्विपक्षपक्षयोः
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयो-
समं प्रवर्तयन्मनः कदासदाशिवं भजे १२

कदा निलिम्पनिर्झरीनिकञ्जकोटरे वसन्
विमुक्तदुर्मतिस्सदा शिरस्थमञ्जलिं वहन्
विमुक्तलोललोचनो ललाटफाललग्नकः
शिवेति मन्त्रमुच्चरन् कदासुखी भवाम्यहम् १३

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवम्
पठन् स्मरन् ब्रुवन्नरो विशुद्धधीमतिक्षणात्
हरे गुरौ सुभक्तिमाशुयाति नान्यथा गतिम्
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् १४

पूजावसानसमये दशवक्त्रगीतं
यःशम्भुपूजनमिदं पाति प्रदोषे
तस्यस्थिरां रथगजेन्द्रतुरङ्गयुक्ताम्

लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः १५

इति दशकण्ठरावणविरचित शिवताण्डवस्तोत्रम् सम्पूर्णम्

# അദ്ധ്യായം 3

## liṅgāṣṭakam

ब्रह्ममुरारिसुरार्चितलिङ्गम्
निर्मलभासितशोभितलिङ्गम्
जन्मजदुःखविनाशकलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०१

देवमुनिप्रवरार्चितलिङ्गम्
कामदहं करुणाकरलिङ्गम्
रावणदर्पविनाशकलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०२

सर्वसुगन्धसुलेपितलिङ्गम्
बुद्धिविवर्द्धककारणलिङ्गम्
सिद्धसुरासुरवन्दितलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०४

कनकमहामणिभूषितलिङ्गम्
फणिपतिवेष्टितशोभितलिङ्गम्
दक्षसुयज्ञविनाशनलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०५

कुङ्कुमचन्दनलेपितलिङ्गम्
पङ्कजहारसुशोभितलिङ्गम्
सञ्चितपापविनाशनलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०६

देवगणार्च्चितसेवितलिङ्गम्
भावैर्भक्तिभिरेव च लिङ्गम्
दिनकरकोटिप्रभाकरलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०७

अष्टदलोपरिवेष्टितलिङ्गम्
सर्वसमुत्भवकारणलिङ्गम्
अष्टदरिद्रविनाशकलिङ्गम्
तत्प्रणमामि सदाशिवःलिङ्गम् ०८

इति श्रीशङ्कराचार्यविरचितलिङ्गाष्टकं सम्पूर्णम्

# Bibliography

शङ्कराचार्य ग्रन्थाः

Please send corrections to Raman.K.R,Kizhakkedath Mana,

Mannampatta,PALAKKAD.Ph:- 0466 2268910 Mob: 09447963680

Last updated February 4, 2010